दिनाङ्कः 02/10/2025 सायम् - 06:20

**आदौ मुख्यवार्ता:**

- रक्षामन्त्रिणा राजनाथसिंहेन अद्य सञ्चेतितं यत् सर-क्रीकक्षेत्रे पाकिस्तानस्य दुस्साहसं नैव सहिष्यते।
- सूचना-प्रौद्यौगिकीमन्त्री अश्विनी-वैष्णवः प्रोक्तवान् यत् विद्यत्घटकीय-विनिर्माण-योजनायै एक-दशमलव-पञ्चदशलक्ष-कोटिरुप्यात्मकाः निवेशप्रस्तावाः समायाताः ।
- राष्ट्रियस्वयं-सेवकसंघस्य सरसंघचालकः डॉ. मोहनभागवतः प्रोक्तवान् यत् स्वदेशी-स्वावलम्बनयोः कोऽपि विकल्पः नैव भवितुमर्हति ।
- अद्य देशः राष्ट्रपित्रे महात्मा-गान्धिने, लाल-बहादुर-शास्त्रिणे च श्रद्धाञ्जलिं समर्पयति।
- विजयादशम्याः पर्व्व अद्य सम्पूर्णे देशे महोल्लासेन आचर्य्यते ।

**अथ वार्ता: विस्तरेण**

**राजनाथ-कच्छः**

रक्षामन्त्रिणा राजनाथसिंहेन अद्य सञ्चेतितं यत् सर-क्रीकक्षेत्रे पाकिस्तानस्य दुस्साहसं नैव सहिष्यते । सहैव एतस्य प्रत्युत्तररूपेण तावत् इतिहासभूगोलौ उभावपि परिवर्तिष्यते । श्रीसिंहेन भुजनगरे विजयादशम्याः अवसरे सेनाक्षमताभ्यासे भागः गृहीतः । अत्रावसरे सः शस्त्रपूजनसमारोहेऽपि भागम् अभजत् । शस्त्र-पूजनानन्तरं सैनिकान् सम्बोधयन् तेन प्रोदीरितं यत् सिन्दूराभियानावधौ पाकिस्तानदेशः लेहस्थलात् आरभ्य सर-क्रीक-पर्यन्तं भारतस्य रक्षाप्रणाल्याः भेदने असाफल्यं अवाप्नोत् । प्रत्युत्तरे भारतीय-सेनया पाकिस्तानस्य वायु-रक्षाप्रणालीं प्रभज्य विश्वस्मिन् अयं सन्देशः प्रसारितः यत् भारतदेशः पाकिस्तान-देशस्य यदा-कदाऽपि महतीं क्षतिं कर्तुं शक्नोति।

अवसरेऽस्मिन् रक्षामन्त्रिणा राजनाथसिंहेन सिन्दूराभियाने भूमिकां आविष्कृतवद्भ्यः सैनिकेभ्यः अपि सम्मानः प्रदत्तः।

**वैष्णव-विद्युत्योजना**

सूचना-प्रौद्यौगिकमन्त्री अश्विनी-वैष्णवः प्रोक्तवान् यत् विद्यत्घटकीय-विनिर्माण-योजनायै एक-दशमलव-पञ्चदशलक्ष-कोटिरुप्यात्मकाः निवेशप्रस्तावाः समायाताः । नवदिल्ल्यां वार्ताहरान् विज्ञापयन् श्रीवैष्णवः प्रोक्तवान् यत् अस्याः योजनायाः अन्तर्गतं आवेदनस्य अन्तिमतिथिः गतदिने समाप्ता सहैव एतस्मिन् प्राप्तावेदनानां सङ्ख्या ऐतिहासिकी वर्तते। तेनोक्तं यत् विगतेषु एकादशवर्षेषु सम्पादितः विश्वासः इदानीं निवेश-वृत्तिसृजन-उत्पादनेषु च परिवर्तते।

**आरएसएस-विजयादशमी**

राष्ट्रियस्वयं-सेवकसंघस्य सरसंघचालकः डॉ. मोहनभागवतः अद्य नागपुरस्य रेशमबाद-स्थले विजयादशम्याः आर-एस-एस इत्यस्य च शताब्दी-वर्षसमारोहे जनान् सम्बोधितवान्। अत्रावसरे सः अवोचत् यत्

आत्मनिर्भरतायाः वैश्विक-एकतायाश्च समर्थकत्वेन अस्माभिः एतत् सुनिश्चेतव्यं यत् परावलम्बनं अस्माकं दुर्बलता न भवेत्, वयं स्वेच्छया कार्य-करणे समर्थाः भवेम । तेन प्रोक्तं यत् स्वदेशी-स्वावलम्बनयोः कोऽपि विकल्पः नैव भवितुमर्हति । सः एतदपि प्रख्यातवान् यत् अस्माभिः अन्ताराष्ट्रिय-व्यापारिक-सम्बन्धानामपि संरक्षणं विधातव्यम् । अवसरेऽस्मिन् पूर्वराष्ट्रपतिः रामनाथ-कोविंदः मुख्यातिथित्वेन अस्मिन् कार्यक्रमे उपस्थितः आसीत् । श्रीभागवतः उक्तवान् यत् पहलगाम-आक्रमणानन्तरं अस्माभिः देशस्य दृढनेतृत्वम्, सशस्त्रबलानां शौर्य्यं, समाजस्य दृढसंकल्पः ऐक्यमनश्च अवलोकितः।

<u>गान्धि-जयन्ती</u>

अद्य देशः राष्ट्रपितुः महात्मा-गान्धिनः षड्पञ्चाशदधिकैक-शततमायाः जयन्त्यवसरे तस्मै श्रद्धाञ्जलिं समर्पयति। अवसरेऽस्मिन् न केवलं भारते अपितु विदेशेष्वपि विविधाः कार्यक्रमाः आयोज्यन्ते। अस्मिन् अवसरे राष्ट्रिय-राजधान्याः राजघाटक्षेत्रे गान्धिनः समाधिस्थले सर्वधर्म-प्रार्थना सभायाः आयोजनं विहितम्। तत्र तावत् राष्ट्रपतिः द्रौपदी मुर्मुः, उपराष्ट्रपतिः सीपी राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी, लोकसभाध्यक्षः ओम बिरला, आवास एवं नगरीय-प्रकरणानां मन्त्री मनोहर-लाल इत्येते महात्मा-गान्धिने पुष्पाञ्जलिं समर्पितवन्तः।

विपक्षदलस्य नेता राहुल-गान्धी राष्ट्रपित्रे महात्मा-गान्धिने श्रद्धाञ्जलिं समर्पितवान्। असौ एकस्मिन् अन्तर्जालीय-पटल-संदेशमाध्यमेन प्रोक्तवान् यत् महात्मा-गान्धिना सत्य-अहिंसा-सद्भावानां सिद्धान्तमाध्यमेन देशः एकत्रीकृतः। अनेन सर्वेऽपि शान्ति-सत्यतादिषु सन्मार्गेषु गन्तुं प्रेरिताः भविष्यन्ति। देशः अद्य भूतपूर्व-प्रधानमन्त्रिणः लाल-बहादुर- शास्त्रिणः एकविंशत्यधिकैकशततमायाः जयन्त्यवसरे तमपि स्मरति। उपराष्ट्रपतिः सी.पी. राधाकृष्णन् अद्य पूर्व-प्रधानमन्त्रिणे लाल बहादुर शास्त्रिणे श्रद्धाञ्जलिं समर्पितवान्। सममेव प्रोक्तवान् यत् शास्त्रिणः जीवनं नेतृत्वं च सत्यतायाः नैतिकतायाः साहसस्य च उदाहरणमस्ति। एतत् तावत् युवकानां राष्ट्रस्य हिताय च प्रेरणादायकं भविष्यति। अस्मिन् अवसरे श्री मोदी प्रोक्तवान् यत् लाल बहादुर शास्त्री एकः असाधारण-राजनेता आसीत्। तस्य विनम्र-स्वभावेन दृढ-संकल्पेन च असामान्य समये अपि देशः सुदृढः सञ्जातः ।

<u>प्रधानमन्त्री-छन्नूलालमिश्रः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना शास्त्रीय-गायकस्य छन्नूलाल-मिश्रस्य निधनमाश्रित्य शोकः प्रकटितः । गायकस्य अद्य प्रभाते एकोन-नवतितमे वयसि मिर्जापुरे निधनम् अभवत् । सः तावत् बहुभ्यः मासेभ्यः अस्वस्थः आसीत्। सामाजिक-सञ्चालीय-सन्देशे श्रीमोदिना प्रोक्तं यत्तेन जीवनपर्यन्तं भारतीयकलायाः संस्कृतेश्च संवर्धनाय कार्यं कृतम्।

<u>अमितशाह-बचत</u>

महात्मगान्धिनः जयन्त्यवसरे गृहमन्त्री अमितशाहः अद्य नवदिल्लीस्थे खादी-ग्रामोद्योगभवने जीएसटी इति वस्तु सेवाकर-बचत-महोत्सवे खादी- ग्रामोद्योग उत्पादानमाधृत्य राष्ट्रव्यापिनः न्यूनकर-विक्रयापणस्य शुभारम्भं कृतवान् । अद्यारभ्य नवम्बरमासस्य पञ्चदिनांकं यावत्

खादी-ग्रामोद्योगमेलके जनेभ्यः खादी परिधानेषु विंशतिप्रतिशतपरिमितस्य शुल्कमुक्तिः भविष्यति। तथा च खादीग्रामोद्योग-उत्पादकेषु दश- प्रतिशतपरिमितस्य शुल्कमुक्तिः भविष्यति।

## विजयादशमी

विजयादशम्याः पर्व्व अद्य सम्पूर्णे देशे महोल्लासेन आचर्य्यते । अयं दिवसः नवरात्रि-पर्वणः समाप्तेः प्रतीकः अस्ति । अयं उत्सवः भगवतः रामस्य विजयाय आचर्यते। राष्ट्रपतिपदासीना द्रौपदी मुर्मुः राजधान्याः नवदिल्ल्याः रक्तदुर्गस्य माधव-दास-उद्याने आयोजिते दशहरा- उत्सवे भागग्रहणं करिष्यति । अपरत्र प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रीयराजधान्याः आईपी एक्सटेंशन क्षेत्रे रामलीला समितिद्वारा आयोजिते दशहरा-उत्सवे भागं भजिष्यति। राष्ट्रपतिः द्रौपदी मुर्मुः, प्रधानमन्त्री नरेन्द्रमोदी च विजयादशमी पर्वमाधृत्य देशवासिभ्यः शुभकामनां प्रदत्तवन्तौ।

।।इति वार्ता:।।